# राजस्थान बोर्ड परीक्षा 2019-20
# 10वीं कक्षा
# तृतीय भाषा-संस्कृतम्
# मॉडल पेपर-तृतीय

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :-**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत-माध्यमेन एव लेखनीयानि।

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

स्वामिकेशवानन्दस्य जन्म पौषमासे 1940 तमे विक्रम-संवत्सरे (ईस्वी 1883) राजस्थानस्य सीकर-जनपदे मगलूणा-ग्रामे अभवत्। अस्य पितुर्नाम ठाकुरसी ढाका इति मातुश्च नाम साराँ इत्यासीत्। बाल्ये केशवानन्दस्य नाम 'बीरमा' इत्यासीत्। यदा एषः बालः सप्तवर्षकल्पः आसीत् तदैव उष्ट्रमेकमाश्रित्य रतनगढ़-स्थले जीवनयापनं कुर्वन्नस्य पिता दिवङ्गतः।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'कर्मयोगी स्वामी केशवानन्दः' शीर्षक पाठ से उद्धृत है। इस अंश में स्वामी केशवानन्द के जन्म का परिचय दिया गया है। इनका जन्म राजस्थान के सीकर जिले में हुआ था एवं इनका बचपन का नाम 'बीरमा' था।

**हिन्दी-अनुवाद-** स्वामी केशवानन्द का जन्म पौष-माह में विक्रम संवत् 1940 में (सन् 1883 ई. में) राजस्थान के सीकर जिले के 'मगलूणा' गाँव में हुआ था। इनके पिता का नाम 'ठाकुरसी ढाका' और माता का नाम 'साराँ' था। बचपन में केशवानन्द का नाम 'बीरमा' था। जब यह बालक लगभग सात वर्ष का था, तभी एक ऊँट पर बैठकर 'रतनगढ़' नामक स्थान पर जीवन-यापन करते हुए इनके पिता का स्वर्गवास हो गया।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं स रचयामास। तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन् काले 'चावण्ड' स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य, विद्यायाश्च प्रमुखकेन्द्रम् आसीत्।

अन्ते असावधानतया पादे धनुष्-प्रत्यञ्चाघातेन प्रतापोऽस्वस्थोऽभवत्। 1597 तमे ईस्वीयाब्दे प्रतापः दिवंगतः। प्रतापः महान् सेनानायकः, जननायकः, व्यवस्थापकः, सङ्घटनकर्त्ता च आसीत्। भारतवासिनः अधुनापि तस्य स्वातन्त्र्यप्रेमिणः शौर्यगाथां गायन्ति।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'महाराणा-प्रतापः' शीर्षक पाठ से उद्धृत है। मेवाड़ के राजा महाराणा-प्रताप का मुगल सम्राट् अकबर की सेना से अनवरत युद्ध में धन के अभाव के कारण जब वे विचलित होने लगे तो मेवाड़ के भामाशाह ने अपनी अर्जित विपुल धन-सम्पत्ति देश-रक्षा हेतु प्रताप को समर्पित कर दी थी। प्रस्तुत अंश में भामाशाह द्वारा प्राप्त सम्पत्ति से महाराणा-प्रताप द्वारा सैन्य-शक्ति का संग्रह करने, स्वतन्त्रता-युद्ध करने का, अपने राज्यों को स्वतंत्र कराने का प्रेरणास्पद वर्णन हुआ है।

**हिन्दी अनुवाद-** उससे (भामाशाह के धन से) फिर से सैन्य-शक्ति का संग्रह कार्य प्रारम्भ कर दिया और उन्होंने विशाल सेना की रचना की और उस सेना के द्वारा मुगल-शासक से स्वतंत्रता का युद्ध प्रारम्भ कर दिया। अपने राज्य के अपने हाथ से निकले हुए अनेक भागों को पुनः अपने नियन्त्रण में कर लिया। उनमें मोही, गोगुन्दा, उदयपुर आदि मुख्य थे। अपने राज्य में शान्ति की स्थापना करके 'चावण्ड' नामक स्थान को अपनी राजधानी बनाया। उस समय 'चावण्ड' नामक स्थान स्थापत्य कला का, ललित कला का, व्यापार का और विद्या का प्रमुख केन्द्र था।

अन्त में असावधानी से पैर में धनुष की प्रत्यञ्चा की चोट से प्रताप अस्वस्थ हो गये। सन् 1597 ई. में प्रताप का स्वर्गलोक हो गया। प्रताप महान् सेनापति, जननायक, व्यवस्थापक और संघटनकर्ता थे। भारतवासी आज भी उनकी स्वतन्त्रता प्रिय शौर्य-गाथाओं को गाते हैं।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

समानसंस्कृतिमतां यावती पितृ–पुण्यभूः।
तावतीं भुवमावृत्य राष्ट्रमेकं निगद्यते।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत श्लोक हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'स्वराष्ट्र–गौरवम्' शीर्षक पाठ से उद्धृत किया गया है। इस श्लोक में एक समान संस्कृति वाले लोगों के भू–भाग को एक 'राष्ट्र' बतलाते हुए कहा गया है कि–

**हिन्दी–अनुवाद–** एक समान संस्कृति को मानने वाले लोगों की जितनी पैतृक पवित्र भूमि है, उतनी भूमि को घेरकर अर्थात् उस भू–भाग को एक राष्ट्र कहा जाता है।

**अथवा**

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

कस्तूरी जायते कस्मात्, को हन्ति करिणां कुलम्।
किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायते।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत श्लोक हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'वाक्केलिः' शीर्षक पाठ से लिया गया है। इस श्लोक में एक पहेली है, जिसमें प्रारम्भ के तीन चरणों में तीन प्रश्न हैं तथा चतुर्थ चरण में तीन पदों में उनके क्रमशः उत्तर हैं–

**हिन्दी अनुवाद–** प्रस्तुत पहेली के तीन चरणों में तीन प्रश्न हैं, जिनका उत्तर चतुर्थ चरण में है। यथा–

| | प्रश्न | | उत्तर |
|---|---|---|---|
| 1. | कस्तूरी किससे उत्पन्न होती है? | — | मृग से। |
| 2. | हाथियों के कुल को कौन मारता है? | — | सिंह। |
| 3. | कायर युद्ध में क्या करता है? | — | भाग जाता है। |

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4

नन्दामि मेघान् गगनेऽवलोक्य,
नृत्यामि गायामि भवामि तुष्टः
नाहं कृषिज्ञः पथिकोऽपि नाहं,
वदन्तु विज्ञाः मम नामधेयम्।।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतप्रहेलिका अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'वाक्केलिः' इतिशीर्षकपाठाद् उद्धृता। अस्यां प्रहेलिकायां मयूरस्य वाक्क्रीडामाध्यमेन मनोरमं वर्णनं कृतम्।

**संस्कृत–व्याख्या–** प्रस्तुतप्रहेलिकायां कथितं यत्–आकाशे जलदान् दृष्ट्वा अहम् आनन्दम् अनुभवामि, नृत्यं करोमि, गानं करोमि तथा च प्रसन्नः भवामि। अहं कृषकः नास्मि, अहं यात्री चापि नास्मि। ये जानन्ति ते मम नाम कथयन्तु।

**विशेषः–** अस्याः प्रहेलिकायाः उत्तरं वर्तते– 'मयूरः' इति। अत्र वाक्चातुर्येण मयूरस्य यत् वर्णनं कृत्वा प्रश्नं पृष्टम्, तस्योत्तरमपि तत्रैव निहितम्।

**अथवा**

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4

गहनारण्ये घनान्धकारे
बंधुजना ये स्थिता गह्वरे।
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम्।।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'लोकहितं मम करणीयम्' इतिशीर्षकपाठाद् उद्धृतम्। अस्मिन् पद्ये सदैव पीड़ितानां विपत्तिग्रस्तानां च सहायतां लोकहितं च करणस्य प्रेरणा प्रदत्ता।

**संस्कृत–व्याख्या–** कविः विपत्तिग्रस्तजनानां सहायतार्थं प्रेरयन् कथयति यत् ये बान्धवजनाः गंभीरे वने, निबिडान्धकारे, गर्ते च स्थिताः सन्ति, तत्र मया सञ्चारं कर्त्तव्यम्, अर्थात् तेषां सहायता करणीया। मम सदैव लोककल्याणं कर्त्तव्यम्।

**विशेषः–**

1. अत्र कविना लोककल्याणस्य प्रेरणा प्रदत्ता। दुःखभग्नेषु पीडितेषु सदैव सहायकरूपेण वयं तिष्ठाम।
2. पद्यस्य भाषा सरला, सरसा, मधुरा चास्ति।

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**राजा** – किमर्थं प्रतिषिद्धाः स्मः?

**प्रथमा** – श्रृणोतु महाराजः! एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।

**राजा** – अथ गृह्णाति?

**प्रथमा** – ततस्तं सर्पो भूत्वा दशति।

**राजा** – भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?

**उभे** – अनेकशः।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयम् महाकविकालिदास–विरचितस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमांकात् संकलितः। अंशेऽस्मिन् राज्ञः दुष्यन्तस्य सर्वदमनस्य रक्षाकरण्डकविषये तापसीभ्यां सह वार्तालापं वर्णितम्।

**संस्कृत–व्याख्या–**

**राजा** – वयं केन कारणेन निषेधः कृताः।

**प्रथमा तापसी** – आकर्णयतु महाराजः! इयम् अपराजिता नामधेया औषधिः अस्य बालकस्य जातकर्मसंस्कार समये महर्षिमारीचेन प्रदत्ता। इमाम् औषधिं (रक्षासूत्रम्) मातापितरौ अथवा स्वयमेवातिरिच्य अन्यः कोऽपि पृथिव्यां पतितां गृहीतुं न शक्नोति।

**राजा** – चेत् कोऽपि उत्थापयति?

**प्रथमा तापसी** – तदनन्तरं तत् रक्षाकरण्डं तं जनं सर्पं भूत्वा दशनं करोति।

**राजा** – भवतीभ्यां कदापि एतस्याः विकारः प्रत्यक्षरूपेण दृष्टः?

**उभे** – अनेकवारम्।

**विशेषः–** अत्र महाकविकालिदासस्य नाट्यकौशलं सुस्पष्टं दृश्यते। कविना अतीव नैपुण्येन बालकस्य सर्वदमनस्य परिचयं प्रस्तुतम्। घटनाचक्रेण सुस्पष्टं भवति यत् सः बालकः दुष्यन्तपुत्रः एव।

**अथवा**

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें।
आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु- 3

**द्वितीयः भिल्लः** - न जाने अस्य मेवाड़देशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो! परमेश्वर!! त्वम् अपि अद्य इयान् निष्ठुरः कथं जातः!

**तृतीयः भिल्लः** - हा धिक्! वराकस्य समीपे न जीवनसामग्री न च युद्धसामग्री एव विद्यते। मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? (रोदिति)

**उत्तरम् :**

**प्रसङ्गः-** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वदेशं कथं रक्षेयम्' इतिशीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री कांकरेण विरचिता एकांकी वर्तते। अंशेऽस्मिन् यदा धनाभावे सैन्यशक्त्याभावे च राणाप्रतापः स्वदेशं परित्यक्तुं समुद्यतः भवति तदा तस्य भिल्लसैनिकाः विलापं कुर्वन्तीति वर्णितम्।

**संस्कृत-व्याख्या-**

**द्वितीयः भिल्लः** - एतस्य मेवाड़प्रदेशस्य भाग्ये विधिना किं रचितमस्तीति न जानामि। हे दीनदयालो! परमेश्वर!! त्वम् अपि एतावत् दयाहीनः केन प्रकारेण अभवत्?

**तृतीयः भिल्लः** - हा धिक्! दीनस्य प्रतापस्य समीपे जीवनसाधनमपि नास्ति न च समरसाधनम् अर्थाद् धन-सैन्यादिकं साधनमपि नास्ति। वयं स्वस्य मातृभूमेः दयनीयां दशां कथं अवलोकयिष्यामः? (इत्थं विलपन् रोदनं करोति।)

**विशेषः-** अत्र भिल्लानां प्रतापं प्रति स्वामिभक्तिः, श्रद्धा, प्रेम-भावना, करुणा च प्रकटिता। ते प्रतापं खिन्नं दृष्ट्वा स्वयमपि पीड़िताः भवन्ति।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु- 3

1. सूरजमल्लस्य जन्म कदा अभवत्?
2. भारतस्य उत्तरस्यां दिशि किं स्थितम् अस्ति?
3. प्रतापस्य जन्म कदा अभवत्?
4. भारत वसुधा किं किं ददाति?
5. पृथिव्यां कियन्ति रत्नानि? कानि च तानि?
6. मरुमरीचिकां स्पष्टी कुर्वन्तु।
7. पञ्चतन्त्रस्य कति तन्त्राणि तेषां नामानि लिखत।
8. धर्मात् किं न करणीयम्?

**उत्तरम् :**

1. सूरजमल्लस्य जन्म वसन्तपञ्चम्याम् (13 फ्रेब्रवरी दिने) 1707 तमे ईस्वीय वर्षे अभवत्।
2. भारतस्य उत्तरस्यां दिशि हिमालयः (हिमाद्रिः) स्थित अस्ति।
3. प्रतापस्य जन्म विक्रमस्य 1597 तमे वर्षे (1540 ई.) ज्येष्ठ शुक्लतृतीयायाम् अभवत्।
4. भारतवसुधा शान्तिं, लक्ष्मी सुखं च ददाति।
5. पृथिव्यां त्रीणि रत्नानि सन्ति-
   (क) जलम्
   (ख) अन्नम्
   (ग) सुभाषितं च।
6. बालुकायाः तरंगिताः स्तूपाः जलम् इव प्रतिभान्ति अतः मृगाः पिपासुः जलाशयं मत्वा दूरं दूरं धावति नश्यति च।
7. पञ्चतन्त्रस्य पञ्चतन्त्राणि सन्ति, तेषां नामानि-
   (क) मित्रभेदः
   (ख) मित्रसम्प्राप्तिः
   (ग) काकोलूकीयम्
   (घ) लब्धप्रणाशः
   (ड़) अपरीक्षितकारकम् च इति।
8. धर्मात् न प्रमदितव्यम्।

**निर्देशः प्रश्न संख्या 6-9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु-**

**6.** जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। 1

**उत्तरम् :**
जननी जन्मभूमिश्च कस्मात् अपि गरीयसी?

**7.** प्रतापस्य राज्ये जनक्षतिः धनक्षतिः च संजाता। 1

**उत्तरम् :**
कस्य राज्ये जनक्षतिः धनक्षतिः च संजाता?

**8.** देवी सुरभारती मानसहंसे आसीना भवति। 1

**उत्तरम् :**
देवी सुरभारती कुत्र आसीना भवति?

**9.** अकबरस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत्। 1

**उत्तरम् :**
कस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत्?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**उत्तरम् :**

1. प्रियवाक्य-प्रदानेन सर्वे तुष्यति जन्तवः।
   तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।
2. गुणैः गौरवमायाति नोच्चैः आसनमास्थितः।
   प्रासादशिखरस्थोऽपि काको न गरुडायते।।

**11.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु-

पुण्योऽस्माकं देशः भारतवर्षः। न केवलं भौगोलिकदृष्ट्या अपितु सांस्कृतिकदृष्ट्या अपि अस्य देशस्य महत्त्वपूर्णं स्थानं वर्तते। विश्वेऽस्मिन् भारतीयसंस्कृतिः विश्ववन्द्याः सर्वग्राह्याश्च। भारतदेशे विभिन्नसम्प्रदायानां विविधभाषाणाम्, अनेकदेवानाम्, भिन्नभिन्नानां दर्शनानां च प्रचारः प्रचलत्येव। तथापि भारतीयानां 'भिन्नत्वे एकत्वमिति' कथनं सर्वेष्वपि क्षेत्रेषु दृश्यते।

भारतदेशः विश्वस्य सर्वोत्कृष्टं वृहत्स्वरूपात्मकं जनतन्त्रात्मकं राष्ट्रं वर्तते। अत्र देवस्वरूपः हिमालयः मुकुटमणिरिव शोभते। भारते मधुरजलयुक्ताः गंगायमुनासरयूकृष्णादयः नद्यः वहन्ति। अयं देशः नानातीर्थैः रमणीयः, मुनिजनदेवैः च वन्दनीयोऽस्ति। भारतस्य भूमिः अध्यात्ममयी, गौरवपूर्णा,शान्तिवहा, सुखदा, सस्यश्यामला, हिरण्यरूपा, अतिकमनीया चास्ति। रत्नाकरोऽपि स्वस्य रत्नाकरत्वं पुनरपि प्राप्तुं भारतभव्यभूमेः चरणौ वृणीते।

भारतदेशः देवैरुपास्यः मुनिभिश्च सेव्यः वर्तते। वेदपुराणेषु अपि अस्य महिमा वर्णिता। वस्तुतः धन्यतमोऽयं भारतदेशः।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) अस्माकं देशः भारतवर्षः कीदृशः? 1
   (ख) अत्र कः मुकुटमणिरिव शोभते। 1
   (ग) भौगोलिकदृष्ट्या कस्य महत्त्वपूर्णं स्थानं वर्तते? 1
   (घ) भारतीयानां किम् कथनं सर्वेष्वपि क्षेत्रेषु दृश्यते? 1
   (ङ) विश्वस्य सर्वोत्कृष्टं जनतन्त्रात्मकं राष्ट्रं किम् वर्तते? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) "अस्य देशस्य महत्त्वपूर्णं स्थानं ............।" अत्र समुचितं पूरणीयक्रियापदं किमस्ति? 1
   (ख) 'देवस्वरूपः हिमालयः'–अत्र विशेषणपदं किम्? 1
   (ग) "वेदपुराणेषु अपि 'अस्य' महिमा वर्णिता।" इत्यत्र सर्वनामपदस्थाने समुचितं संज्ञापदं किम्? 1
   (घ) 'भारतदेशः विश्वस्य सर्वोत्कृष्टं राष्ट्रं वर्तते' –अत्र कर्तृपदं किम्? 1

**उत्तरम् :**

1. भारतवर्षः।
2. (क) पुण्यः।
   (ख) हिमालयः।
   (ग) भौगोलिकदृष्ट्या भारतदेशस्य महत्त्वपूर्णं स्थानं वर्तते।
   (घ) भारतीयानां 'भिन्नत्वे एकत्वमिति' कथनं सर्वेष्वपि क्षेत्रेषु दृश्यते।
   (ङ) विश्वस्य सर्वोत्कृष्टं जनतन्त्रात्मकं राष्ट्रं भारतदेशः वर्तते।
3. (क) वर्तते।
   (ख) देवस्वरूपः।
   (ग) भारतदेशस्य।
   (घ) भारतदेशः।

**12.** अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु।
1. जलौघः 1
2. वाग्दानम् 1

**उत्तरम् :**

1. जल + ओघः (वृद्धि सन्धि)
2. वाक् + दानम् (जश्त्व सन्धि)

**13.** अधोलिखितपदयोः संन्धिं कृत्वा सन्धेः नामापि लिखतु।
1. देवः + अपि 1
2. कर्मणि + एव 1

**उत्तरम् :**

1. देवोऽपि (विसर्ग सन्धि)
2. कर्मण्येवः (यण् सन्धि)

**14.** अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामानि लिखत–
1. अहं कृष्णसर्पम् अपश्यम् 1
2. तत्र शिवः च केशवः च पठतः 1
3. सः प्रतिमासम् आगच्छति 1

**उत्तरम् :**

1. कृष्णं सर्पम् इति, कर्मधारयसमासः।
2. शिवकेशवौ, द्वन्द्वसमासः।
3. मासं मासं प्रति, अव्ययीभावसमासः।

**15.** अधोलिखितरेखांकित पदेषु विभक्तिं तत् कारणं च लिखतु।
1. मह्यं संगीतं रोचते 1
2. अहं त्वया विना न गमिष्यामि 1
3. अहं मित्रेण सह पठामि। 1

**उत्तरम् :**

1. चतुर्थी विभक्तिः, रुच् धातुयोगे।
2. तृतीया–विभक्तिः, 'विना' योगे।
3. तृतीया–विभक्तिः, 'सह' योगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।
1. सः मां .......... हसति। (दृश् (पश्य्) + शतृ) 1
2. कष्टपर्वते .......... (चर् + अनीयर्) 1

**उत्तरम् :**

1. पश्यन्।
2. चरणीयम्।

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।
1. मया बहूनि कार्याणि करणीयानि सन्ति। 1
2. परिश्रमं कुर्वाणः जनः सिद्धिं लभते। 1

**उत्तरम् :**

1. कृ + अनीयर्।
2. कृ + शानच्।

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु।

| पुरा, सहसा, यथा, उच्चैः |
|---|

1. कक्षायाम् .......... न वदेत्। 1
2. चन्द्रगुप्तः .......... राजा अभवत्। 1
3. आवां .......... कुत्रापि न गच्छावः। 1

**उत्तरम् :**

1. कक्षायाम् उच्चैः न वदेत्।
2. चन्द्रगुप्तः पुरा राजा अभवत्।
3. आवां सहसा कुत्रापि न गच्छावः।

**निर्देशः– प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** अश्वाः राजमार्गे धावन्ति। 1

**उत्तरम् :**

अश्वैः राजमार्गे धाव्यते।

**20.** अस्माभिः गीतं गीयते। 1

**उत्तरम् :**

वयम् गीतं गायामः।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**21.** बालिका हसति। 1

**उत्तरम् :**

बालिकया हस्यते।

**22.** घटिकाचित्रस्य सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–



1. सः .......... विद्यालयं गच्छति। 1
2. मम जनकः ............ वादने जयपुरं गमिष्यति। 1

**उत्तरम् :**

1. सः दशवादने विद्यालयं गच्छति।
2. मम जनकः सपादचतुर् वादने जयपुरं गमिष्यति।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. तौ गृहं गच्छन्ति। 1
2. मम मित्र अत्र आगच्छति। 1
3. वृक्षात् फलाः पतन्ति। 1

**उत्तरम् :**

1. तौ गृहं गच्छतः।
2. मम मित्रम् अत्र आगच्छति।
3. वृक्षात् फलानि पतन्ति।

**24.** भवान् दशम्याः कक्षायाः छात्रः राहुलः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रं लिखतु। 4

**उत्तरम् :**

सेवायाम्,
श्रीमन्तः प्रधानाचार्यामहोदयाः
राजकीयः आदर्श–उच्च माध्यमिक–विद्यालयः,
जयपुरम् (राज.)

**विषयः**– दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रम्।

महोदयाः!

सविनयं निवेदनम् अस्ति यत् अहं अद्य ज्वरेण पीड़िता संजाता। अतः अद्य विद्यालये आगन्तुम् असमर्था अस्मि।
(प्रार्थना अस्ति यत् 15.04.20.... तः 16.04.20.... दिनांकपर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।)

दिनांक–14.04.20.... भवताम् आज्ञाकारी शिष्यः
राहुलः
कक्षा– दशमी

**अथवा**

**24.** भवान् कमलेशः, छात्रावासे वसति। शारदीये अवकाशे भवतां विद्यालये संस्कृतसम्भाषणशिविरं प्रचलिष्यति, अतः भवान् गृहं न गमिष्यति इति सूचयन् पितरं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखतु। 4

| |
|---|
| **मञ्जूषा**– सम्यक्, जयपुरतः, कुशलिनः, मातृचरणयोः कमलेशः, सादरं वन्दनानि, समाप्ता, संस्कृतसम्भाषणशिविरम्। |

नर्मदाछात्रावासः
नवोदयविद्यालयः
...............
दिनांकः– 25.03.20....

परमपूज्यपितृमहाभागाः!
...............
अत्र कुशलं तत्रास्तु। तत्रापि भवन्तः सर्वे .......... इति मन्ये। अत्र मम पठनं .......... प्रचलति। अर्द्धवार्षिकी परीक्षा ..........। मम विद्यालये शारदीयेऽवकाशे .......... प्रचलिष्यति। अतः अहम् अवकाशदिनेषु गृहम् आगन्तुं न शक्नोमि। भवतां दर्शनेन अहं वञ्चितः भवामि इति खेदः, तथापि शिविरेण मम ज्ञानवर्धनं भविष्यति इति नास्ति सन्देहः। .......... अपि मम वन्दनानि। स्वकीयं क्षेमसमाचारं सूचयन्तु इति।

भवदीयः पुत्रः
..............

**उत्तरम् :**

नर्मदाछात्रावासः
नवोदयविद्यालयः
जयपुरतः
दिनांकः– 25.03.20....

परमपूज्यपितृमहाभागाः!
सादरं वन्दनानि।
अत्र कुशलं तत्रास्तु। तत्रापि भवन्तः सर्वे कुशलिनः इति मन्ये। अत्र मम पठनं सम्यक् प्रचलति। अर्द्धवार्षिकी परीक्षा समाप्ता। मम विद्यालये शारदीयेऽवकाशे संस्कृतसम्भाषणशिविरं प्रचलिष्यति। अतः अहम् अवकाशदिनेषु गृहम् आगन्तुं न शक्नोमि। भवतां दर्शनेन अहं वञ्चितः भवामि इति खेदः, तथापि शिविरेण मम ज्ञानवर्धनं भविष्यति इति नास्ति सन्देहः। मातृचरणयोः अपि मम वन्दनानि। स्वकीयं क्षेमसमाचारं सूचयन्तु इति।

भवदीयः पुत्रः
कमलेशः

**25.** मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं संवादं पूरयत– 4

| |
|---|
| फलानाम्, मह्यम्, मम, आम्रम्, इच्छामि, सर्वेषाम्, रोचते, प्रियम् |

**अध्यापकः**– सुधीर, त्वम् किम् इच्छसि?
**सुधीरः**– श्रीमन्, अहम् सेवम् खादितुम् ..........।
**अध्यापकः**– राधिके, तुभ्यं किं ..........?
**राधिका**– .......... नारङ्गम् रोचते।
**सुदीपः**– मम कदलीफलम् .......... अस्ति।
**अध्यापकः**– शोभने, तव किं प्रियम्?
**शोभनाः**– .......... नारिकेलम् प्रियम्।
**अध्यापकः**– .......... तु .......... राजा। एतत् .......... प्रियम्।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**उत्तरम् :**

**अध्यापकः–** सुधीर, त्वम् किम् इच्छसि?

**सुधीरः–** श्रीमन्, अहम् सेवम् खादितुम् इच्छामि।

**अध्यापकः–** राधिके, तुभ्यं किं रोचते?

**राधिका–** मह्यम् नारङ्गम् रोचते।

**सुदीपः–** मम कदलीफलम् प्रियम् अस्ति।

**अध्यापकः–** शोभने, तव किं प्रियम्?

**शोभनाः–** मम नारिकेलम् प्रियम्।

**अध्यापकः–** आम्रम् तु फलानाम् राजा। एतत् सर्वेषाम् प्रियम्।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. नूतन गीत गाती है।
2. हम सब खाना खाते हैं।
3. वह दूध पीए।
4. प्रातः भ्रमण करना चाहिए।
5. मुझे प्रतिदिन दूध पीना चाहिए।
6. रमेश घर चला गया।

**उत्तरम् :**

1. नूतन गीतं गायति।
2. वयं भोजनं खादामः।
3. सः दुग्धं पिबतु।
4. प्रातः भ्रमणं कुर्यात्।
5. अहं प्रतिदिनं दुग्धं पिबेयम्।
6. रमेशः गृहं अगच्छत्।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट् वाक्यानि रचयतु– 3

| |
|---|
| निर्धारितमार्गेषु, सड़कसुरक्षार्थम्, मात्रासह, गतिनियमानाम, राजमार्गस्य, कारयाने। |



**उत्तरम् :**

**वाक्यानि–**

1. इदं चित्रं राजमार्गस्य वर्तते।
2. चित्रे द्वौ बालकौ स्वस्य मात्रा सह राजमार्गे गच्छतः।
3. राजमार्गे कारयाने स्वनिर्धारितपंक्तौ स्तः।
4. सड़कसुरक्षार्थं यातायातस्य नियमाः पालनीयाः।
5. वाहनस्य गतिनियमानां पालनं करणीयम्।
6. राजमार्गे निर्धारितमार्गेषु एव गन्तव्यम्।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखतु– 3

| |
|---|
| रक्तानि, वृक्षम्, उपवनम्, अपृच्छत्, क्रीडन्ति, पितामहेन, गुलमोहर–वृक्षः, ग्रीष्मकाले। |

प्रातः सुदीपः .......... सह उद्यानम् अगच्छत्। तत्र जनाः भ्रमन्ति बालाः च ..........। सुदीपः एकम् सुन्दरम् पुष्पितं .......... अपश्यत्। सः पितामहम् .......... 'एषः कः वृक्षः'? पितामहः अवदत् एषः .......... अस्ति। .......... गुलमोहर–वृक्षे सुन्दराणि .......... पुष्पाणि आगच्छन्ति। गुलमोहर–वृक्षैः .......... रमणीयम्।

**उत्तरम् :**

प्रातः सुदीपः पितामहेन सह उद्यानम् अगच्छत्। तत्र जनाः भ्रमन्ति बालाः च क्रीडन्ति । सुदीपः एकम् सुन्दरम् पुष्पितं वृक्षम् अपश्यत्। सः पितामहम् अपृच्छत् 'एषः कः वृक्षः'? पितामहः अवदत् एषः गुलमोहर–वृक्षः अस्ति। ग्रीष्मकाले गुलमोहर–वृक्षे सुन्दराणि रक्तानि पुष्पाणि आगच्छन्ति। गुलमोहर–वृक्षैः उपवनम् रमणीयम्।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
2. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पंकिलं जलम् आनयत्।
3. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अति खिन्नः अभवत्।
4. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
5. एकः गजः आसीत्।
6. सः जलं पातुं स्नातुं च प्रतिदिनम् सरितः तटम् अगच्छत्।

**उत्तरम् :**

1. एकः गजः आसीत्।
2. सः जलं पातुं स्नातु च प्रतिदिनं सरितः तटम् अगच्छत्।
3. एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।
4. क्रुद्धः सन् गजः सरितः तटम् अगच्छत्। तत्र स्नात्वा जलं च पीत्वा स्वकरे पंकिलं जलम् आनयत्।
5. सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।
6. तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अतिखिन्नः अभवत्।

*******

सत्र 2020–21 से नये पाठ्यक्रमानुसार सभी कक्षाओं के सभी विषयों की टेक्स्ट बुक एवं सभी प्रकार की सहायक अध्ययन सामग्री विद्यार्थियों को मोबाइल पर व्हाट्सएप द्वारा एवं वेबसाइट www.rbse.online पर उपलब्ध करवायी जाएगी। इसके लिये विद्यार्थियों से किसी भी प्रकार का कोई शुल्क नहीं लिया जाएगा। इसके लिये विद्यार्थियों को किसी भी प्रकार का कोई OTP Verification या Email द्वारा Verification नहीं देना होगा। हमारा व्हाट्सएप नम्बर जानने या अन्य किसी भी प्रकार की जानकारी के लिये वेबसाइट www.rbse.online पर विजिट करें।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएेंगे।